॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

## अथ शुक्र मंत्रः

ओं अस्य श्री शुक्र महामंत्रस्य भारद्वाज ऋषिः। अनुष्टुप्छंदः। शुक्रो देवता। मम शुक्र प्रसादसिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) दानवपूजिताय अंगुष्ठाभ्यां नमः। दैत्याचार्याय तर्जनीभ्यां नमः। वरदाय मध्यमाभ्यां नमः। श्वेतवस्त्राय अनामिकाभ्यां नमः। शुक्राय कनिष्ठिकाभ्यां नमः। कमंडल धराय करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) दानवपूजिताय हृदयाय नमः। दैत्याचार्याय शिरसे स्वाहा। वरदाय शिखायै वषट्। श्वेतवस्त्राय कवचाय हुं। शुक्राय नेत्रत्रयाय वौषट्। कमंडल धराय अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) जटिलंसाक्षसूत्रं च वरदंडकमंडलम्। श्वेतवस्त्रावृतं शुक्रं ध्यायेद्दानव पूजितं। (लमित्यादि पंच पूजा) ओं लं पृथ्वितत्वात्मने गंधान्धारयामि। ओं हं आकाशतत्वात्मने पुष्पं समर्पयामि। ओं यं वायुतत्वात्मने धूपमाघ्रापयामि। ओं रं वह्नितत्वात्मने दीपन्दर्शयामि। ओं वं अमृततत्वात्मने अमृतनैवेद्यं समर्पयामि। सर्वतत्वात्मने सर्वोपचार पूजां समर्पयामि॥ ओं प्रवश्शुक्राय भानवे भरध्वम्। हव्यं मतिंचाग्नये सुपूतम्। यो दैव्यानि मानुषा जनूग्ंषि। अंतर्विश्वानि विद्म ना जिगाति॥ इति शुक्र मंत्रः॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com